# दशमः पाठः

# बुद्धिः सर्वार्थसाधिका

संसारे उत्तमजीवनाय बुद्धिपूर्वकः व्यवहारः आवश्यकः भवति। बुद्धिपूर्वकेण व्यवहारेण कठिनम् अपि कार्यं सहजं भवति। विशेषतः स्पर्धायाः समये यदि प्रतिपक्षः अतीव प्रबलः, तर्हि बुद्धिबलेन वयं तं जेतुं शक्नुमः। शरीरबलात् बुद्धिबलस्य महत्त्वं कथम् अधिकम् इति एषा कथा प्रतिपादयति। एतां कथां वयं पठामः।

एकस्मिन् वने एकः नित्यजलपूर्णः महान् सरोवरः अस्ति। कदाचिद् एकं पिपासाकुलं गजयूथं वनान्तरात् तत्र आगच्छति। तस्मिन् सरोवरे ते गजाः स्वेच्छया जलं पीत्वा, स्नात्वा, क्रीडित्वा च सूर्यास्तसमये निर्गच्छन्ति। तस्य च सरोवरस्य तीरे समन्तात् सुकोमलभूमौ बहूनि शशक-बिलानि सन्ति, येषु बहवः शशकाः निवसन्ति। गजानां परिभ्रमणेन तेषु बिलेषु निवसन्तः बहवः शशकाः क्षतविक्षताः भवन्ति, केचन पुनः मृताः अपि भवन्ति। अतः शशकाः भीताः चिन्तामग्नाः च भवन्ति। ते दुःखम् अनुभवन्ति। स्वरक्षार्थं च ते उपायं चिन्तयन्ति।



एकस्मिन् दिने सायङ्काले तेषां शशकानां सभा भवति। सर्वे शशकाः स्वमतं प्रकाशयन्ति। परं ते समाधानं न प्राप्नुवन्ति। अन्ते शशकराजः वदति– "अहमेव उपायं चिन्तयामि। अधुना वयं सर्वे स्वगृहं गच्छामः।"

अन्यस्मिन् दिवसे रात्रौ सः शशकराजः यूथाधिपस्य गजराजस्य समीपं गच्छति। सः गजराजं कथयति– "हे गजराज ! एषः सरोवरः चन्द्रस्य वासस्थानम् अस्ति। वयं शशकाः तस्य प्रजाः स्मः, अत एव सः शशाङ्कः इति नाम्ना प्रसिद्धः। यदा शशकाः जीवन्ति तदा एव चन्द्रः प्रसन्नः भवति।"

गजराजः पृच्छति– "कथम् अहं विश्वासं करोमि ? किं सत्यमेव चन्द्रः सरोवरे तिष्ठति ?" यदि सरोवरः चन्द्रदेवस्य वासस्थानं तर्हि तत् प्रदर्शयतु । शशकः कथयति- आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एव सरोवरं प्रति चलावः।"

गजराजः शशकराजेन सह सरोवरस्य समीपं गच्छति। सः जले चन्द्रस्य प्रतिबिम्बं पश्यति, चकितः च भवति। सः भयेन चन्द्रं नमति। ततः सः गजयूथेन सह अन्यत्र गच्छति। सः गजयूथः पुनः कदापि तस्य सरोवरस्य समीपं न आगच्छति। शशकाः तत्र सुखेन तिष्ठन्ति। सत्यम् एव उक्तम् – '**बुद्धिः सर्वार्थसाधिका**'।





Reprint 2026-27

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| सरोवरः | जलाशयः | तालाब | Pond / Lake | |
| गजः | हस्ती | हाथी | Elephant | |
| शशकः | शशः | खरगोश | Rabbit | |
| मृताः | हताः | मरे हुए | Dead | |
| भीताः | भययुक्ताः | डरे हुए | Scared | |
| प्रतिबिम्बम् | प्रतिबिम्बम् | प्रतिबिम्ब | Reflection | |
| चिन्तामग्नः | चिन्ताकुलः | चिन्तित | Worried | |
| शशाङ्कः | चन्द्रः | चन्द्रमा | Moon | |
| नाम्ना | नामधेयेन | नाम से | By name | |

### अवधेयांशः

क्रियापदानां मूलं धातुः अस्ति।

**यथा** – पठति इति क्रियापदस्य मूलं – '**पठ्**' इति धातुः अस्ति।

निवसन्ति – नि + **वस्**     भवन्ति – **भू** (भव्)     गच्छति – **गम्** (गच्छ्)

प्रकाशयन्ति – प्र + **काश्** (**काशि**)     नमति – **नम्**     तिष्ठन्ति – **स्था** (तिष्ठ्)



## वयम् अभ्यासं कुर्मः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) सरोवरस्य तीरे सुकोमलभूमौ बिलेषु के निवसन्ति? – ..............................

(ख) केषां परिभ्रमणेन शशकाः क्षतविक्षताः मृताः च भवन्ति? – ..............................

(ग) शशकराजः कस्य समीपं गच्छति? – ..............................

(घ) के स्वमतं प्रकाशयन्ति? – ..............................

(ङ) कः चन्द्रं नमति? – ..............................

(च) के सुखेन तिष्ठन्ति? – ..............................

© NCERT not to be republished



Reprint 2026-27

२. **पूर्णवाक्येन उत्तराणि लिखन्तु —**

(क) चन्द्रः कदा प्रसन्नः भवति? ..........................................

(ख) सायङ्काले केषां सभा भवति? ..........................................

(ग) शशकाः किमर्थम् उपायं चिन्तयन्ति? ..........................................

(घ) चन्द्रः केन नाम्ना प्रसिद्धः अस्ति? ..........................................

(ङ) "आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एव सरोवरं प्रति चलावः" इति कः कथयति?

..........................................

३. **पाठस्य आधारेण पट्टिकातः क्रियापदानि चित्वा वाक्यानि पूरयन्तु —**

निवसन्ति चिन्तयन्ति भवति कथयति तिष्ठति

(क) किं चन्द्रः सरोवरे .......................... ?

(ख) सर्वे शशकाः उपायं .......................... ।

(ग) सायंकाले शशकानां सभा .......................... ।

(घ) शशकाः सरोवरस्य तीरे .......................... ।

(ङ) सः गजराजं .......................... ।

४. **उदाहरणानुसारं निम्नलिखितानां पदानां वचनं पुरुषं च लिखन्तु —**

| पदम् | पुरुषः | वचनम् |
|---|---|---|
| चिन्तयति | प्रथमपुरुषः | एकवचनम् |
| तिष्ठन्ति | .................. | .................. |
| जीवन्ति | .................. | .................. |
| नमति | .................. | .................. |
| कथयति | .................. | .................. |
| गच्छति | .................. | .................. |



Reprint 2026-27

© NCERT not to be republished

५. उदाहरणानुसारं समुचितैः क्रियापदैः रिक्तस्थानानि पूरयन्तु—

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गम् | गच्छति | गच्छतः | गच्छन्ति |
| कथ् | कथयति | ............... | ............... |
| स्था | .................. | ............... | तिष्ठन्ति |
| कृ | करोमि | कुर्वः | ............... |
| जीव् | .................. | ............... | जीवन्ति |
| चल् | .................. | चलावः | ............... |

६. चित्रस्य आधारेण पञ्च वाक्यानि लिखन्तु—



(क) ........................................................................................................................

(ख) ........................................................................................................................

(ग) ........................................................................................................................

(घ) ........................................................................................................................

(ङ) ........................................................................................................................



Reprint 2026-27

© NCERT not to be republished

७. अधोलिखितानां पर्यायपदानां मेलनं कृत्वा रिक्तस्थानानि पूरयन्तु —

| | | | | |
|---|---|---|---|---|
| (क) | गजः | जलाशयः | ……गजः…… | ……हस्ती…… |
| (ख) | पदम् | शशाङ्कः | ……………… | ……………… |
| (ग) | चन्द्रः | जनता | ……………… | ……………… |
| (घ) | सरोवरः | चरणः | ……………… | ……………… |
| (ङ) | प्रजा | हस्ती | ……………… | ……………… |



## योग्यताविस्तरः

१. कार्यारम्भात् कार्यपरिसमाप्तेः कालः वर्तमानकालः उच्यते।
२. वर्तमान-कालस्य कृते लट्लकारः भवति।
३. लकारेषु त्रयः पुरुषाः (प्रथमः मध्यमः उत्तमः) एवञ्च त्रीणि वचनानि (एकवचनम्, द्विवचनम् बहुवचनम्) भवन्ति।

लट्लकारस्य क्रियापदे अधोलिखितानि चिह्नानि भवन्ति।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अति | अतः | अन्ति |
| मध्यमपुरुषः | असि | अथः | अथ |
| उत्तमपुरुषः | आमि | आवः | आमः |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |



## परियोजनाकार्यम्

पाठे पठितानां धातुरूपाणां संग्रहणं कुर्वन्तु। तेषां पुरुषं वचनं च लिखन्तु।



© NCERT not to be republished



Reprint 2026-27